# संस्कृतवार्ताः

**दिनाङ्क :- 04/02/2025**

**सायम् - 06:20**

**इयम् आकाशवाणी**

**सम्प्रति वार्ताः श्रूयन्ताम्**

**प्रवाचकः - पुनीतः त्रिपाठी**

**आदौ मुख्यवार्ताः**

- प्रधानमन्त्री नरेन्द्रमोदी अद्य अवदत् यत् तस्य प्रशासनस्य प्रतिबद्धतायाः, समर्पणस्य, परिश्रमस्य च कारणात् पञ्चविंशति-कोटिजनाः दारिद्र्यात् मुक्ताः जाताः।
- केन्द्रीय-कृषिमन्त्री शिवराजसिंह-चौहानः आश्वासितवान् यत् प्रशासनं कृषिक्षेत्रे अनियमिततां न स्वीकरिष्यति इति।
- श्वः आयोक्ष्यमाने सप्तति-सदस्यात्मिकायाः दिल्लीविधानसभायाः निर्वाचनं सुचारुरूपेण सम्पादयितुं सर्वाः सज्जताः पूरिताः सन्ति।
- चीनदेशः अमेरिकादेशस्य उत्पादेषु प्रतीकार-शुल्कं आरोपयिष्यति।

**अथ वार्ताः विस्तरेण**

**प्रधानमन्त्री मोदी**

प्रधानमन्त्री नरेन्द्रमोदी अद्य अवदत् यत् तस्य प्रशासनेन निर्धनानां कल्याणार्थं नैके पदक्षेपाः उत्थापिताः, यस्य परिणामेन पञ्चविंशति-कोटिजनाः दारिद्र्यात् मुक्ताः जाताः। असौ अवदत् यत् अस्य प्रशासनस्य प्रतिबद्धतायाः, समर्पणस्य, परिश्रमस्य च कारणात् एतत् शक्यम् अभवत्। सः एतदपि अकथयत् यत् प्रशासनं वित्तीय-विवेकं अनुसरन् विकासाय कार्यं कुर्वन् अस्ति। प्रधानमन्त्री अद्य लोकसभायां राष्ट्रपतेः अभिभाषणस्य धन्यवाद-प्रस्तावस्य चर्चायाः प्रत्युत्तरे उक्तवान्। राष्ट्रपतेः अभिभाषणस्य प्रशंसां कुर्वन्, प्रधानमन्त्री अवदत् यत् एतत् प्रेरकम् आसीत्, तथा च विकसितभारताय प्रशासनस्य प्रयत्नान् अपि शक्तिम् अददात्।

प्रशासनेन कृताः उपक्रमाः प्रकाश्य, प्रधानमन्त्री अवदत् यत्, सम्पूर्णे देशे निर्धनजनेभ्यः चतुर्कोटिगृहाणि प्रदत्तानि अथ द्वादशकोटि-शौचालयाः च निर्मिताः, येन कोटिशः जनानां, विशेषरूपेण महिलानां जीवनं सरलं जातम्।

**पार-प्रश्न/शून्यहोरा**

अद्य केन्द्रीय-कृषिमन्त्री शिवराजसिंह-चौहानः आश्वासितवान् यत् प्रशासनं कृषिक्षेत्रे अनियमिततां न स्वीकरिष्यति इति भ्रष्टाचारविरुद्धं उचित कार्याचरणम् भविष्यति। अद्य लोकसभायां प्रश्नकाले तेन इदमुक्तम्। महाराष्ट्रस्य कृषिविभागे पञ्चसहस्र-कोटिरूप्यकाणां भ्रष्टाचारस्य आरोपानाम् उत्तरं प्रददन् मन्त्री एनसीपी-नेतुः सुप्रिया सुले इत्यस्याः उत्तरं ददाति स्म। श्रीचौहानः अवदत् यत् यदि किमपि अनियमितं दृश्यते तर्हि अन्वेषणं भविष्यति, दोषिणः विरुद्धं उचितकार्याचरणं भविष्यति।

कृषिमन्त्री कृषकाणाम् आयवर्धनाय प्रधानमन्त्रिणः नरेन्द्रमोदिनः प्रतिबद्धतायां बलं दत्तवान्।

**विरामः**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in**

**महाकुम्भ**

सम्प्रति महाकुम्भवार्ताः ।

**कट- ऋचा झा**

**अथमहाकुम्भवार्ताः- देश-विदेशयोः प्रमुखाः जनाः गङ्गा-यमुना-सरस्वती-नदीनां पवित्र-त्रिवेणीसङ्गमे आस्थापूर्णं स्नानं कुर्वन्ति। भूटानदेशस्य नरेशः जिग्मे खेसर नामग्याल वाङ्गचुक इत्येषः अद्य प्रातः प्रयागराजं सम्प्राप्य मुख्यमन्त्रिणा योगि आदित्यनाथेन सह त्रिवेणीसङ्गमे पूजार्चनां कृतवान्। भूटाननरेशः ह्यः उत्तरप्रदेशे लखनऊनगरं सम्प्राप्तवान्। भूटानदेशस्य राजा प्रयागराजे अक्षयवटं बृहद्-हनुमान-मन्दिरं च प्रति दर्शनार्थं गतवान्। अत्रावसरे उत्तरप्रदेशस्य मुख्यमन्त्री योगि-आदित्यनाथः अपि उपस्थितो आसीत्। भूटान-देशस्य राज्ञः एषा यात्रा भारत-भूटान-देशयोः मैत्री-सांस्कृतिक-सम्बन्धान् च अधिकं सुदृढं कर्तुं महत्त्वपूर्णा अस्ति। मेलकस्य आरम्भः जनवरी-मासस्य त्रयोदश-दिनाङ्के अभवत्, अद्यावधि अष्टत्रिंशत्-कोट्यधिकाः श्रद्धालवः त्रिवेणी-सङ्गमे स्नानम् अकुर्वन्।**

**तत्रैव महाकुम्भ-प्रयागराजे वसन्तपञ्चम्याः दिव्यं भव्यं च अमृत-स्नानं समाप्तम्। यत्र प्रयागराजस्य त्रिवेणी-सङ्गमे देशविदेशात् सहस्रशः श्रद्धालवः पवित्रं स्नानम् अकुर्वन्। मेलक-प्राधिकरणेन अनुमानितं यत्, वसन्तपञ्चमी-पर्वणि प्रायः पञ्च-दशांशोत्तर-द्विकोट्यधिकाः श्रद्धालवः सङ्गम-स्नानम् अकुर्वन्। अमृत-स्नाने भागं ग्रहीतुं गतेभ्यः दिनेभ्यः लक्षोपलक्षाः श्रद्धालवः प्रयागराजं सम्प्राप्तवान्। अवधेयास्पदं वर्तते यत् प्रयागराज-रेल-मण्डलेन तीर्थयात्रिणां सुगम-आवागमनार्थं वसन्तपञ्चमी-पर्वणः दिवसे षडधिकैक-शत-मेलक-विशेष-रेलयानानि सफलतया प्रचालितानि।**

**[संस्कृतवार्ताकक्षतः ऋचा झा ]**

## दिल्लीनिर्वाचनम्

श्वः आयोक्ष्यमाने सप्तति-सदस्यात्मिकायाः दिल्लीविधानसभायाः निर्वाचनं सुचारुरूपेण सम्पादयितुं सर्वाः सज्जताः पूरिताः सन्ति। मतदानं प्रातः सप्तवादनादारभ्य सायं षड्वादनं यावत् प्रचलिष्यति। षड्पञ्चाशल्लक्षाधिकैक कोटितोप्यधिक-मतदातारः स्वमताधिकाराणां प्रयोगं करिष्यन्ति। दिल्लीविधानसभायां भाजपा, आम आदमी पार्टी, काङ्ग्रेस इत्येतेषु मध्ये त्रिपक्षीयस्पर्धा दृश्यते। विधानसभानिर्वाचने नवनवत्यधिक-षड्शतं यावत् प्रत्याशिनः नैर्वाचनिक-समराङ्गणे सन्ति। मतगणना शनिवासरे अष्टमे दिनाङ्के भविष्यति। निर्वाचनायोगेन विधानसभानिर्वाचनार्थं अशीतिसहस्राधिकैकलक्षं यावत् कर्मचारिणः नियोजिताः सन्ति। मतदातॄन आक्रष्टुं प्रलोभनेषु विंशत्यधिकद्विशतं कोटिरूप्यकाणि, मद्यं, मादकद्रव्याणि, उपहाराणि च गृहीतानि।

## रिजिजु- पीएम

संसदीयकार्याणां मन्त्री किरेन् रिजिजुः एकस्मिन् सामाजिकान्तर्जालीय-सन्देशे विपक्षस्य नेतुः काङ्ग्रेसनेतुः च राहुलगान्धिनः वाक् प्राहारे उक्तवान् यत् सः अनुसूचित-जाति, अनुसूचित-जनजाति, अन्यपश्चवर्तिवर्ग इत्येतेषु विषयेषु चर्चां कुर्वन् अस्ति, परञ्च अन्यपश्चवर्तिवर्ग-समुदायस्य बृहत्तमं नेतृत्वं प्रधानमन्त्रिणं मोदिनं ज्ञातुं असफलः जातः।

## ओम बिरला

लोकसभायाः अध्यक्षः ओम बिरला इत्येषः अद्य संविधान-सदनस्य केन्द्रीय-सभागारे पूर्वलोकसभाध्यक्षस्य एम्. अनन्तशयनम् आय्यङ्गार् इत्यस्य जन्मजयन्त्यवसरे तस्मै पुष्पांजलिम् अर्पितवान्। राज्यसभायाः उपसभापतिः हरिवंशः, संसदसदस्याः, पूर्वसदस्याः तथा लोकसभायाः महासचिवः उत्पलकुमार सिंहः अपि श्री आय्यङ्गार्-वर्यं प्रति पुष्पांजलिम् अर्पितवन्तः। पूर्व लोकसभा अध्यक्ष, M.A. आय्यङ्गार इत्येषः एकः वयोवृद्धः स्वातन्त्र्ययोद्धा, प्रख्यातः संसदसदस्यः च आसीत्। सः केन्द्रीयविधानसभायाः, संविधानसभायाः, अस्थायीसंसद-सदस्य, प्रथमतः तृतीयलोकसभायाः च सदस्यः आसीत्।

## शुल्कवृद्धि - अमेरिका

अद्य अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्प् इत्यनेन चीनदेशस्य वस्तुषु आरोपितस्य दश-प्रतिशत-मितस्य शुल्कस्य प्रतिक्रियारूपेण चीनदेशः प्रतिकारोपायान् अघोषयत्। चीनदेशस्य वाणिज्यमन्त्रालयः अवदत् यत् सः अमेरिकादेशस्य उत्पादेषु प्रतीकार-शुल्कं आरोपयिष्यति। प्रतिकारोपायेषु अमेरिका-देशात् अङ्गारस्य, द्रवीकृत-प्राकृतिकवातेः च आयातेषु पञ्चदशप्रतिशतं यावत् करः सम्मिलितो वर्तते। अशोधित-तैलेषु, कृषि-यन्त्रेषु, बृहत्-यन्त्र-कारयानेषु च दशप्रतिशतमितं शुल्कं भविष्यति। अद्यारभ्य चीनदेशस्य आयातेषु शुल्कवृद्धेः अनन्तरम् एव एतत् कार्यम् अभवत्। एतदतिरिच्य, बीजिङ्ग्-देशः अमेरिकादेशस्य गूगल्-संस्थायाः विरुद्धं अन्वेषणाय घोषणां कृतवान्। इतः प्राक्, सीमा-सुरक्षा-प्रयत्नान् सुदृढं कर्तुं द्वयोः प्रतिवेशि-

देशयोः सहमत्यानन्तरम् अमेरिकादेशस्य राष्ट्रपतिः, कनाडा-मैक्सिको-देशयोः अमेरिकादेशेन आरोपित-शुल्कवृद्धौ एकमासस्य विलम्बस्य घोषणाम् अकरोत्।

**भारत-संयुक्तराष्ट्रसङ्घ**

भारतेन अस्मै वर्षाय संयुक्तराष्ट्रसङ्घस्य नियमितवित्त-सङ्कल्पनापत्रस्य कृते महत्त्वपूर्णं योगदानं प्रदत्तम्, यस्य व्ययः आहत्य षड् चत्वारि दशांशोत्तर-सप्तत्रिंशत् मिलियन-अमेरिकीय-डालरमितः अस्ति। एतत् समयोचितं प्रतिदानं भारतं संयुक्तराष्ट्रसङ्घस्य प्रति स्ववित्तीय-बाध्यतां समयोचित-रूपेण पूरयितुं प्रशंसितानां पञ्चत्रिंशत्-सदस्यराष्ट्राणां एकस्मिन् विशिष्टसमूहे स्थापयति।

**।। इति वार्ता:।।**